श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे

# ॥ द्विनवतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ द्विनवतितमः सर्गः ॥

## भरतेन भरद्वाजाद् गन्तुमनुज्ञाग्रहणं श्रीरामस्याश्रमे गमनाय मार्गस्य परिचयग्रहणं मुनये मातृणां परिचयं दत्त्वा ततश्चित्रकूटं गन्तुं ससैन्यस्य भरतस्य प्रस्थानम्

ततस्तां रजनीं व्युष्य भरतः सपरिच्छदः।
कृतातिथ्यो भरद्वाजं कामादभिजगाम ह ॥ **2.92.1** ॥

तमृषिः पुरुषव्याघ्रं प्रेक्ष्य प्राञ्जलिमागतम्।
हुताग्निहोत्रो भरतं भरद्वाजोऽभ्यभाषत ॥ **2.92.2** ॥

कच्चिदत्र सुखा रात्रिस्तवास्मद्विषये गता।
समग्रस्ते जनः कच्चिदातिथ्ये शंस मेऽनघ ॥ **2.92.3** ॥

तमुवाचाञ्जलिं कृत्वा भरतोऽभिप्रणम्य च।
आश्रमादुपनिष्क्रान्तमृषिमुत्तमतेजसम् ॥ **2.92.4** ॥

सुखोषितोऽस्मि भगवन् समग्रबलवाहनः।
बलवत्तर्पितश्चाहं बलवान् भगवंस्त्वया ॥ **2.92.5** ॥

अपेतक्लमसन्तापाः सुभिक्षाः सुप्रतिश्रयाः।
अपि प्रेष्यानुपादाय सर्वे स्म सुसुखोषिताः ॥ **2.92.6** ॥

आमन्त्रयेऽहं भगवन् कामं त्वामृषिसत्तम।
समीपं प्रस्थितं भ्रातुर्मैत्रेणेक्षस्व चक्षुषा ॥ **2.92.7** ॥

आश्रमं तस्य धर्मज्ञ धार्मिकस्य महात्मनः।
आचक्ष्व कतमो मार्गः कियानिति च शंस मे॥ **2.92.8** ॥

इति पृष्टस्तु भरतं भ्रातुर्दर्शनलालसम्।
प्रत्युवाच महातेजा भरद्वाजो महातपाः॥ **2.92.9** ॥

भरतार्धतृतीयेषु योजनेष्वजने वने।
चित्रकूटगिरिस्तत्र रम्यनिर्झरकाननः॥ **2.92.10** ॥

उत्तरं पार्श्वमासाद्य तस्य मन्दाकिनी नदी।
पुष्पितद्रुमसञ्छन्ना रम्यपुष्पितकानना॥ **2.92.11** ॥

अनन्तरं तत्सरितश्चित्रकूटं च पर्वतम्।
तयोः पर्णकुटीं तात तत्र तौ वसतो ध्रुवम्॥ **2.92.12** ॥

दक्षिणेन च मार्गेण सव्यदक्षिणमेव च।
गजवाजिसमाकीर्णां वाहिनीं वाहिनीपते॥ **2.92.13** ॥

वाहयस्व महाभाग ततो द्रक्ष्यसि राघवम्।
प्रयाणमिति च श्रुत्वा राजराजस्य योषितः॥ **2.92.14** ॥

हित्वा यानानि यानार्हा ब्राह्मणं पर्यवारयन्।
वेपमाना कृशा दीना सह देव्या सुमित्रया॥ **2.92.15** ॥

कौसल्या तत्र जग्राह कराभ्यां चरणौ मुनेः।
असमृद्धेन कामेन सर्वलोकस्य गर्हिता॥ **2.92.16** ॥

कैकेयी तत्र जग्राह चरणौ सव्यपत्रपा।
तं प्रदक्षिणमागम्य भगवन्तं महामुनिम्॥ **2.92.17** ॥

अदूराद् भरतस्यैव तस्थौ दीनमनास्तदा।
तत्र पप्रच्छ भरतं भरद्वाजो महामुनिः॥ **2.92.18** ॥

विशेषं ज्ञातुमिच्छामि मातॄणां तव राघव।
एवमुक्तस्तु भरतो भरद्वाजेन धार्मिकः॥ **2.92.19** ॥

उवाच प्राञ्जलिर्भूत्वा वाक्यं वचनकोविदः।
यामिमां भगवन् दीनां शोकानशनकर्शिताम्॥ **2.92.20** ॥

पितुर्हि महिषीं देवीं देवतामिव पश्यसि।
एषां तं पुरुषव्याघ्रं सिंहविक्रान्तगामिनम्॥ **2.92.21** ॥

कौसल्या सुषुवे रामं धातारमदितिर्यथा।
अस्या वामभुजं श्लिष्टा या सा तिष्ठति दुर्मनाः॥ **2.92.22** ॥

इयं सुमित्रा दुःखार्ता देवी राज्ञश्च मध्यमा।
कर्णिकारस्य शाखेव शीर्णपुष्पा वनान्तरे॥ **2.92.23** ॥

एतस्यास्तौ सुतौ देव्याः कुमारौ देववर्णिनौ।
उभौ लक्ष्मणशत्रुघ्नौ वीरौ सत्यपराक्रमौ॥ **2.92.24** ॥

यस्याः कृते नरव्याघ्रौ जीवनाशमितो गतौ।
राजा पुत्रविहीनश्च स्वर्गं दशरथो गतः॥ **2.92.25** ॥

क्रोधनामकृतप्रज्ञां दृप्तां सुभगमानिनीम्।
ऐश्वर्यकामां कैकेयीमनार्यामार्यरूपिणीम्॥ **2.92.26** ॥

ममैतां मातरं विद्धि नृशंसां पापनिश्चयाम्।
यतोमूलं हि पश्यामि व्यसनं महदात्मनः॥ **2.92.27** ॥

इत्युक्त्वा नरशार्दूलो बाष्पगद्गदया गिरा।
विनिःश्वस्य स ताम्राक्षः क्रुद्धो नाग इव श्वसन्॥ **2.92.28** ॥

भरद्वाजो महर्षिस्तं ब्रुवन्तं भरतं तदा।
प्रत्युवाच महाबुद्धिरिदं वचनमर्थवित्॥ **2.92.29** ॥

न दोषेणावगन्तव्या कैकेयी भरत त्वया।
रामप्रव्राजनं ह्येतत् सुखोदर्कं भविष्यति॥ **2.92.30** ॥

देवानां दानवानां च ऋषीणां भावितात्मनाम्।
हितमेव भविष्यद्धि रामप्रव्राजनादिह॥ **2.92.31** ॥

अभिवाद्य तु संसिद्धः कृत्वा चैनं प्रदक्षिणम्।
आमन्त्र्य भरतः सैन्यं युज्यतामिति चाब्रवीत्॥ **2.92.32** ॥

ततो वाजिरथान् युक्त्वा दिव्यान् हेमविभूषितान्।
अध्यारोहत् प्रयाणार्थं बहून् बहुविधो जनः॥ **2.92.33** ॥

गजकन्या गजाश्चैव हेमकक्ष्याः पताकिनः।
जीमूता इव घर्मान्ते सघोषाः सम्प्रतस्थिरे॥ **2.92.34** ॥

विविधान्यपि यानानि महान्ति च लघूनि च।
प्रययुः सुमहार्हाणि पादैरपि पदातयः॥ **2.92.35** ॥

अथ यानप्रवेकैस्तु कौसल्याप्रमुखाः स्त्रियः।
रामदर्शनकाङ्क्षिण्यः प्रययुर्मुदितास्तदा॥ **2.92.36** ॥

चन्द्रार्कतरुणाभासां नियुक्तां शिबिकांशुभाम्।
आस्थाय प्रययौ श्रीमान् भरतः सपरिच्छदः॥ **2.92.37** ॥

सा प्रयाता महासेना गजवाजिसमाकुला।
दक्षिणां दिशमावृत्य महामेघ इवोत्थितः॥ **2.92.38** ॥

वनानि च व्यतिक्रम्य जुष्टानि मृगपक्षिभिः।
गङ्गायाः परवेलायां गिरिष्वथ नदीष्वपि॥ **2.92.39** ॥

सा सम्प्रहृष्टद्विपवाजियूथा
    वित्रासयन्ती मृगपक्षिसङ्घान्।

महद्धनं तत् प्रविगाहमाना
रराज सेना भरतस्य तत्र ॥ **2.92.40** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
अयोध्याकाण्डे द्विनवतितमः सर्गः ॥